C

SL. No. : XX

CCE PF
CCE PR
REVISED

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 63 ]
Total No. of Questions : 63 ]
ಸಂಕೇತ ಸಂಖ್ಯೆ : **16-S**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8
**Code No. : 16-S**

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : First Language — SANSKRIT
# प्रथम भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**(ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ & ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Fresh & Private Repeater)**

ದಿನಾಂಕ : 21. 03. 2019 ] [ Date : 21. 03. 2019
ಸಮಯ : ಬೆಳಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-45 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-45 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 125 ] [ Max. Marks : 125

### *ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 63 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *परीक्षार्थिनां सामान्यसूचना:*

1. अस्मिन् प्रश्नपत्रे त्रिषष्टिः (63) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

 [ Turn over

इतः कर्तयत

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

Tear here

# भागः - A

**( गद्य-पद्य-पूरकपाठाः )**

**( 79 अङ्काः )**

I. एकवाक्येन उत्तरं लिखत — 16 × 1 = 16

1. वृत्रासुरः स्वभावतः कथम् अवर्तत ?
2. सर्वोऽपि जीवराशिः कस्मात् बलं प्राप्नोति ?
3. बाल्ये शास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत् ?
4. भोजस्य पिता कः ?
5. किं किं शाश्वतं तिष्ठति ?
6. मोक्षप्राप्तिः केन भवति ?
7. भारतमाता कैः पूजिता ?
8. वारिमुचः कीदृशं जलं पिबन्ति ?
9. नाट्यस्य गरिमाणं कः अवर्णयत् ?
10. ध्रुवः नारायणं साक्षात्कर्तुं कुत्र प्रस्थितः ?
11. रमणमहर्षेः सहजानि आभरणानि कानि ?
12. इन्द्रः कस्य तपोवनं वव्राज ?
13. विज्ञानप्रदर्शिनी कया आयोजिता आसीत् ?
14. भारतीयभावना निरन्तरं किं ददाति ?
15. नाट्ये कति रसाः सन्ति ?
16. दुःखितः ध्रुवः कस्याः समीपम् अगच्छत् ?

II. चतुर्थपदं लिखत — 4 × 1 = 4

17. हासः — हास्यम् :: शोकः — ..........................।
18. राजाधमः — मुञ्जः :: अमात्याधमः — ........................... ।
19. प्रसन्नात्मेन्द्रियमनाः — स्वस्थः ; क्रियाः सर्वाः — ........................... ।
20. रसरत्नाकरः — नागार्जुनः :: बृहत्संहिता — ........................... ।

III. लघूत्तराणि संस्कृतभाषया लिखत — 5 × 2 = 10

21. अस्थियाचकम् इन्द्रं दधीचिः सानन्दं किम् अवदत् ?

22. कविः कीदृशीं मातरं नमामि इति वदति ?

23. संस्कृतसाहित्यक्षेत्रे ज्ञानपीठप्रशस्ति पुरस्कृतः कः ? सः कदा, कुत्र अजायत ?

24. भोजस्य जन्मपत्रिकां दृष्ट्वा दैवज्ञः किमाह ?

**अथवा**

बुद्धिसागरः मुञ्जं किमाह ?

25. सरस्वतीनद्याः तीरे कस्य आश्रमः आसीत् ? सः कथम् आसीत् ?

IV. श्लोकतात्पर्यं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत — 3 × 2 = 6

26. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्य स्विद्धनम् ।।

27. आङ्गिको वाचिकश्चैव आहार्यः सात्त्विकस्तथा ।
चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः ।।

**अथवा**

नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव तु ।
दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ।।

28. सूर्यदत्तवरः स्वर्णः सुमेरुर्नाम पर्वतः ।
यत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता ।।

V. कव्योः देश-काल-कृतीनां विषये लिखत — 2 × 3 = 6

29. विद्वान हेच०वि० नागराजराव् ।

30. वेदव्यासः ।

VI. यथानिर्देशम् उत्तरं लिखत — 3 × 3 = 9

31. किंस्वित् श्रेष्ठतरं भवेत् ?
कः पाठः ? कः अपृच्छत् ? कम् अपृच्छत् ?

32. लीलावती इति ग्रन्थे बहवः विषयाः निरूपिताः खलु ?
कः पाठः ? का वदति ? कस्य ग्रन्थः एषः ?

33. भगवन् किमिच्छसि ? किमहं ददानि ?
कः पाठः ? कः अवदत् ? कम् अवदत् ?

**अथवा**

शरणागतरक्षणं धर्मः, इति अस्माकं श्रद्धा ।
कः पाठः ? का अवदत् ? शरणागतः कः ?

VII. दशवाक्यैः उत्तरं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 4 × 4 = 16

34. अमरनाथ गुहा विषये का पुराणकथा अस्ति ?

35. हनुमतः जननं बाल्यवृत्तान्तं च पद्यानुगुणं लिखत ।

36. दशरथः पौरवृद्धान् आहूय किम् उक्तवान् ?

**अथवा**

वृत्रवधोपायं ज्ञातुम् आगतान् देवान् ब्रह्मदेवः किम् अवदत् ?

37. डा० सत्यव्रतशास्त्रिमहोदयस्य बाल्यजीवनं विवृणुत ।

VIII. श्लोकौ पूरयत – 2 × 4 = 8

38. पिबन्ति ..........................................................................................

..........................................................................................।

..........................................................................................

.......................................................................... विभूतिः ।।

39. सुखस्य ..........................................................................................

..........................................................................................।

..........................................................................................

.............................................................................. लोकः ।।

IX. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत – 4 × 1 = 4

40. दीर्घायाः कथायाः रचनाकार्यं तु विशेषबुद्धिमता एव साध्यम् । विशेषबुद्धिमान् प्रतिभावान् इति कथ्यते । अविद्यावन्तः ग्रामीणाः अपि रुचिराः कथाः रचितवन्तः । कथायाः मुख्योद्देशः मनोल्लासः । सन्तोषेण सहैव आदर्शविचारान् अपि कथाः यच्छन्ति । कथासु सामान्यजनैः अपि सुलभतया अवबोधकाः शब्दाः वाक्यानि च भवेयुः । सामान्यकथाः अपि रोचिकाः तत्त्वबोधिकाः च भवेयुः ।

i) कः प्रतिभावान् इति कथ्यते ?

ii) दीर्घायाः कथायाः रचनाकार्यं केन साध्यम् ?

iii) कथायाः मुख्योद्देशः कः ?

iv) सामान्यकथाः अपि कथं भवेयुः ?

## भागः - B

### (व्याकरणविभागः)

### (30 अङ्काः)

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकं चत्वारः विकल्पाः प्रदत्ताः । तेषु एकः एव शुद्धः उपयुक्तः वा वर्तते । सम्यक् उत्तरस्य चयनं कृत्वा लिखत — $10 \times 1 = 10$

41. 'शिशुः' अस्य समानार्थकपदम् इदं भवति —
(A) जनकः (B) नायकः
(C) अर्चकः (D) अर्भकः ।

42. 'चरः' अस्य विरुद्धार्थकपदम् इदं भवति —
(A) आचारः (B) अचरः
(C) सञ्चारः (D) विचारः ।

43. 'विद्वान्' अस्य स्त्रीलिङ्गरूपम् इदं भवति —
(A) विदुषी (B) विद्वानी
(C) विद्वाना (D) विदुषिका ।

44. 'ततः + ततः' इत्यत्र विसर्गस्य स्थाने एषः आदेशः भवति —
(A) रेफादेशः (B) उकारादेशः
(C) सकारादेशः (D) लोपादेशः ।

45. 'उपनिषदा' अत्र एषा विभक्तिः अस्ति —
(A) तृतीया विभक्तिः (B) प्रथमा विभक्तिः
(C) द्वितीया विभक्तिः (D) षष्ठी विभक्तिः।

46. 'भवतीति' अत्र एषः सन्धिः अस्ति —
(A) गुणसन्धिः (B) सवर्णदीर्घसन्धिः
(C) यण् सन्धिः (D) जश्त्वसन्धिः ।

47. 'आज्ञापयति' अत्र एषः लकारः भवति —
(A) लृट् लकारः (B) लिट् लकारः
(C) लङ् लकारः (D) लट् लकारः ।

48. भाग्यानि <u>काले</u> फलन्ति – अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदं इदं भवति —
(A) कुत्र (B) कति
(C) कदा (D) कथम् ।

49. 'यतिष्ये' अत्र एषः पुरुषः भवति —
(A) प्रथमपुरुषः (B) अन्यपुरुषः
(C) मध्यमपुरुषः (D) उत्तमपुरुषः ।

50. एतेषु व्याकरणशुद्धं वाक्यम् इदं भवति —
(A) बालकाय मोदकं रोचते (B) बालकस्य मोदकं रोचते
(C) बालकात् मोदकं रोचते (D) बालकेन मोदकं रोचते ।

51. विग्रहवाक्यं विलिख्य समासनाम लिखत – 1 × 2 = 2

a) प्रतिवर्षम्

b) जनसेवा ।

**अथवा**

समासं कृत्वा समासनाम लिखत –

a) विषं कण्ठे यस्य सः =

b) कपिः शार्दूल इव =

52. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत – 1 × 2 = 2

a) ग्रामे शोभमानम् उपवनं भवति ।

b) बालः गृहं गत्वा पठति ।

53. प्रयोगपरिवर्तनं कुरुत – 1 × 2 = 2

a) बालकः पाठं पठति ।

b) अध्यापकेन प्रश्नः पृष्टः ।

54. सन्धिं विभज्य नाम लिखत – 1 × 2 = 2

a) मुनिरिति

b) सूर्यादेव ।

55. लिङ्गविभक्तिवचनानि लिखत – 1 × 2 = 2

a) भाषायाम्

b) आत्मानम् ।

56. लकारपुरुषवचनानि लिखत – 1 × 2 = 2

a) दृश्यते

b) पठ ।

57. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत – 1 × 2 = 2

a) चन्द्रस्य शुक्लपक्षे वृद्धिः सम्भवति ।

b) देवदानवयोः घोरं युद्धं प्रावर्तत ।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत – 1 × 3 = 3

58. श्रीरामः समुद्र इव गम्भीरः ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत – 1 × 3 = 3

59. धर्मश्च जानाति नरस्य वृत्तम् ।

# भागः - C

## (रचनाविभागः)

## (16 अङ्काः)

XIII. संस्कृतभाषया अनुवादं कुरुत — 1 × 3 = 3

60. ನಮ್ಮ ನಗರದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಉದ್ಯಾನದಲ್ಲಿ ಅನೇಕ ಮರಗಳು, ಬಳ್ಳಿಗಳು ಇವೆ. ಜನರು ಉದ್ಯಾನದಲ್ಲಿ ಆನಂದವನ್ನು ಹೊಂದುತ್ತಾರೆ.

    We have a beautiful garden in our city. There are many trees and creepers in the garden. People get pleasure in the garden.

XIV. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत – 1 × 3 = 3

61. भारतदेशे अनेकानि पुण्यक्षेत्राणि वर्तन्ते । भक्ताः तानि द्रष्टुं प्रवासं गच्छन्ति । पुण्यक्षेत्राणां दर्शनं मानसिकम् आनन्दं जनयति ।

XV. पत्रं लिखत – 1 × 5 = 5

62. कोलारनगरस्य सर्वकारीयप्रौढशालायाः जयन्तः / विजया इति मत्वा कारणं संसूच्य दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

    'रामायणम्' इति पुस्तकं प्रेषयितुं निवेद्य धारवाडनगरस्य समाजपुस्तकालयस्य व्यवस्थापकं प्रति आवेदनपत्रं लिखत ।

XVI. 63. एकं विषयम् अधिकृत्य प्रबन्धं लिखत – 1 × 5 = 5

i) परिसरमालिन्यानि

ii) गणराज्योत्सवः

iii) समाचारपत्रम् ।